श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितम्

# ॥ श्रीगोदास्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुजमहादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगोदास्तोत्रम् ॥

गोदाया व्रतमस्तु विश्वविदितं लक्ष्मीव्रतं वा भवेत्
कन्याया व्रतमस्तु विप्रसदने नारायणीयव्रतम्।
गोपीभावमुपेत्य ताभिरुदितं कात्यायनीयव्रतं
गोदा साधु चकार वैष्णवपथा शुद्धान्तसिद्धान्ततः॥ १ ॥

चापाराधनमाचरन्ति मुनयः कर्मण्यतायै स्म तु
प्रातः पूजनमेव तैर्विधिबलात् भीत्याऽथ भक्त्यापि वा।
गोदासूक्तिरसानुभूतिमहितश्रीकेशवाराधनं
भोग्यं नः परमं विधेर्विलसितं कोऽस्माभिरास्ते समः॥ २ ॥

श्रीकार्यं द्विगुणीकृतं चरमया विष्ण्वाशयस्थानया
श्रीमत्कार्यमपि प्रसादपरमं विश्वप्रियं कारितम्।
श्रीसूक्तद्विगुणा यया विरचिता गाथा हि विश्वंभराः
श्रीसूक्तं न कृतं श्रियेति परमां गोदां सदोपास्महे॥ ३ ॥

अर्थार्थी श्रियमर्थयेत भुवने मोक्षार्थिनः केशवं
भक्तार्थी धनिकं प्रजापशुगृहप्रार्थी च यागादिकम्।
युद्धार्थी समरेषु मल्लनिचयं ज्ञानार्थिनः सद्गुरुं
सर्वार्थी सकलां भजामि सततं श्रीविष्णुचित्तात्मजाम्॥ ४ ॥

विद्या ब्रह्मविदो वदन्ति विबुधा द्वात्रिंशदित्यात्मनां
विद्या मुक्तिफलैव साधु कलिता श्रेयोऽर्थिनां सम्मता।
तन्नामप्रथितासु तासु महती विद्या हि विद्योतते
त्रिंशत्पद्यसमर्थिता बहुगुणा गोदात्मविद्या हि नः॥ ५ ॥

आस्तां नाम शठारिदिव्यफणितिः दिव्यार्थसन्दर्शनी
कृष्णप्रेमरसालया भगवती तातस्य दिव्या कृतिः।

www.prapatti.com

भक्तानामविगीतभावमहिताः सारार्थगाथाः शुभाः
गोदासूक्तिसमा न चैव भुवने दृष्टा श्रुता वा कृतिः॥ ६॥

वेदात्मा विहगेश्वरो विधिबलात् श्रीविष्णुचित्तोऽभवत्
नाध्येति स्म समस्तवेदमतुलं यो वेद एव स्वयम्।
जातो वेदचयो यतश्च महितः तज्ज्ञातवेदः परः
तस्मात् श्रीरिव जायते बहुगुणा गोदा स्म तुभ्यं नमः॥ ७॥

गामश्वं पुरुषान् हिरण्यमिति तान् लब्धुं हि लक्ष्मीं स्थिरां
याचन्ते भुवि भोग्यजातमतुलप्रज्ञाः त्रिवर्गे रताः।
भूदा वापि हिरण्यदा भवतु सा दासीप्रदा वाश्वदा
गोदा त्वं तु कलाप्रदा सकलदा भ्राजस्व मन्मानसे॥ ८॥

निष्कृष्टार्थनिवेदनं विविदिषासंवर्धनं स्पष्टता
सारल्यं श्रुतिसम्मतार्थकथनं निस्संशयावेदनम्।
शिक्षापद्धतिरद्भुता मधुरता प्रीतिप्रहर्षोद्गमः
श्रेयः प्रार्थनमित्यमी दशगुणा गोदोक्तिजीवातवः॥ ९॥

किं शास्त्रं किमु काव्यरत्नमथवा भक्तिप्रधाना स्तुतिः
किं वा नाटकमन्यदेवरचनं पौराणिकी किं कथा।
आश्चर्यामलशेमुषीविलसितं किं वा रहस्यत्रयं
गोदागीतमिदं पठन्ति भुवि ये ते धन्यधन्याः जनाः॥ १०॥

पादांभोज समाश्रयेण तुलसी धत्ते स्वरूपस्थितिं
गोविन्दस्तुलसीं नतेन शिरसा धत्ते च रङ्गेस्थितः।
जाता त्वं तुलसीवने स्पृहयती गोविन्दपादांबुजं
गोदे त्वां शिरसा रमासहचरो धत्ते सदा भावुकः॥ ११॥

गोदा रङ्गपतिः बुधास्सहृदयाः क्षाम्यन्तु मे साहसं
गोदासूक्तिरगाधभावभरिता दिव्या बुधानन्दिनी।
एकैकाक्षरगर्भितान् रसगणान् जानाति को वा मनाक्
देवो रङ्गपतिर्नतेन शिरसा संभाव्यते सूरिभिः॥ १२॥



www.prapatti.com

नीरक्षीरपृथक्क्रियासु निपुणा हंसास्तथा वैदिकाः
यत्क्षेत्रे विहरन्ति नूतनपुरं तद्धन्विनो विश्रुतम्।
तत्र श्रीमति नन्दने सुमहति श्रीपर्णशायिप्रभोः
गोदा वैदिकभट्टनाथतनया जाता हि तस्यै नमः॥ १३॥

किं लक्ष्मीः किमु मेदिनी किमुत सा नीला जगन्मोहिनी
किं सीता ! किमुरुक्मिणी भगवतः प्रेष्ठा किमन्या रतिः।
एवं साधु सुतर्किता बहुगुणैरध्यात्मविद्याथवा
तामेतां कलयामि भट्टतनयां गोदां सदानन्दनीम्॥ १४॥

भूमिः मूर्द्धनि राजते भगवतश्चान्या हि वक्षस्स्थले
कण्ठालिङ्गननिर्वृता च महिला नीला च भोगोज्वला।
श्रीपादद्वयपद्मराग रसिका संवाहने संभृता
या गोदा समुपास्महे रसघनां तां तारणी मादृशाम्॥ १५॥

तातादप्यधिका गुणैश्च कलया भक्त्यातथा दिव्यया
प्रेमर्द्धिः वरयां बभूव पुरुषं श्रीरङ्गधामेश्वरम्।
उद्वाहं प्रवदन्ति शोभनतमं चाप्राकृतं बान्धवाः
अर्चाया विभवस्य जातु घटतां किं ब्रूहि गोदे स्वयम्॥ १६॥

रीतिर्लोकविलक्षणा कथमहो जाता त्वदीया परं
भावं प्राकृत मेव पोषयति नो भूत्या इति ज्ञायते।
विश्लेषं सहसे नचैव विदितं गाथासु दिव्यासु ते
तच्चाप्राकृतभावपोषणकरं ! गोदे समाधेहि मे॥ १७॥

भक्तिः प्रेममयी परैव कलिता किं रूपिणी सा भवेत्
जिज्ञासा महती निरुत्तरतया कालात् बहो संस्थिता।
भक्तेषु श्रममारचय्य कठिनं चान्ते सुखं केवलं
पुष्णातीति वयं त्वदीयकृतितो नेहामहे तां पराम्॥ १८॥

जीवाः कर्मकलापरुद्धमतयः क्लिष्टा विभिन्नाध्वगाः
संसृत्यध्वसु सञ्चरन्ति सततं मुग्धास्तथाज्ञानतः।



www.prapatti.com

तद्बोधाय समीरितानि बहुधा शास्त्राणि विद्वत्तमैः
गोदाध्यापयति प्रभुं निजपतिंचोद्बोधयन्ती परम्॥ १९ ॥

ज्ञानं सङ्कुचितं पुमर्थनिचये नास्ति प्रवृत्तिस्ततः
वृत्तिर्वैदिकदूरगा भवति चेत् कालोऽनुकूलो न हि।
एतां जीवगतिं विचिन्त्य परिहारं कल्पयन्ती स्वयं
नाथं प्रेरयसीह रक्षणकृते गोदे हि नस्सांप्रतम्॥ २० ॥

लब्ध्वा त्वां तनयां मुमोद जनकः श्रीविष्णुचित्तो महान्
लब्ध्वा त्वां दयितां मुमोद परमः श्रीरङ्गपृथ्वीपतिः।
लब्ध्वा त्वां स्पृहणीयभक्तिभरितां भक्ता अविन्दन्मुदं
लब्ध्वा त्वां वयमद्भुतां हितकरीं गोदे प्रमोदामहे॥ २१ ॥

लोको हिंसति कर्मजातमखिलं कालस्तथा दारुणो
दैवं हिंसति दैवतं च नितरां विद्यापि हीना भृशम्।
दुष्टानां उपहिंसनं तु घटतां भक्तोपहिंसा कुतः
तं हिंसारसिकं जगाद परमं गोदापि तस्यै नमः॥ २२ ॥

गोदाया महिमा न चैव विदिता पित्रा पितृव्यैस्तथा
रङ्गास्थानमुपेयुषा भगवता श्रीरङ्गनाथेन च।
भक्तैर्भावुकतल्लजैर्न हि परं श्रीवेङ्कटेशः कविः
जानातीति वयं सुनिश्चितधियस्तं ताञ्च सेवामहे॥ २३ ॥

स्वप्नं मत्सरिणं जगाद जनकस्यार्ता सुता जानकी
स्वाभीष्टं प्रथयांबभूव सुभगं श्रीविष्णुचित्तात्मजा।
स्वप्नं सत्यमितीरयन्ति विबुधा स्तत् सत्यमित्यद्भुतं
स्वोद्वाहप्रभवं क्रमञ्च मुदिता गोदाऽभणत् तां नुमः॥ २४ ॥

गोविन्दं वरयांबभूव सुदृढं श्रीवेङ्कटाद्रीश्वरं
तन्नाम प्रणयाल्लिलेख सततं कुड्येषु हृद्यं स्वयम्।
स्वीयां तां विरहव्यथां जलधरान् संप्रेषयन्ती गिरिं
या गोदा निजगाद तत्स्मरणतो दासा हि धन्या वयम्॥ २५ ॥

आस्तां सुन्दरबाहुरद्भुततनुस्सौन्दर्य वारान्निधिः
    सान्द्रांबोदनिभस्सुवर्णलतिकाश्लिष्टो गिरौ वेङ्कटे।
यं गोदा वृणुते स्म नाथमनिशं भूयस्तरां मायया
    रङ्गेशश्चतुरः त्वरापरिगतः त्वामुद्वहन् राजते॥ २६ ॥

त्वञ्चाप्राकृतमुज्वलं यदुवरं प्राप्तुं व्यवस्य स्थिता
    कस्मात् प्राकृतलोकवत् वदसि नो भावं स्वकीयं परम्।
प्राह्लादी परभक्तिरित्यवगतं तस्यां च दृष्टः श्रमः
    तस्मादप्यतिबृंहिता रसघना भक्तिस्त्वया दर्श्यत॥ २७ ॥

विद्यास्थानमिदं चतुर्दशतया सङ्ख्यातमन्यादृशं
    धीवैशद्यकृते सुधीभिरुदितं यद्यप्यनर्थोज्झितम्।
साक्षात् ब्रह्मणि चित्तरञ्जकतमं सद्यः प्रमोदावहं
    नाभूत् तत् दशकैः समर्थितमहो तत्सङ्ख्ययैवाद्भुतम्॥ २८ ॥

प्रत्येकं दशके फलश्रवणतो विज्ञातमेवात्मना
    भूतिं वाञ्छति पारलौकिकसुखं पुष्णाति भक्त्युज्वलम्।
अत्राप्येत्य सुखं परञ्च विभवं पादारविन्दस्थितिं
    गोदाशासनमेतदेव महतां निश्रेयसाप्रापकम्॥ २९ ॥

गाथास्त्रिंशदमन्दवैभवयुताः निःश्रेयसप्रापिकाः
    तत्वं यद्दशभिः प्रतीतमखिलं नारायणः शब्दितः।
तस्माच्चेत् दशभिः हितञ्च कलितं भक्तिप्रपत्यादिकं
    अन्त्ये सङ्कलितः पुमर्थ इति नश्चार्थत्रयं रूपितम्॥ ३० ॥

गोदा श्रीव्रतनामधेयमहितं दिव्यं प्रबन्धं सदा
    सेवन्ते रसिका विमर्शनिरता मह्यन्ति नूनं परे।
श्लाघन्ते मधुमत्तमां च सरणिं विश्वस्य चाप्यायनीं
    लब्ध्वा दायधन क्रमेण महिता धन्या वयं सर्वदा॥ ३१ ॥

सङ्ख्याया विहृतिः विचित्रतमतामभ्येति गाथास्वहो
    सङ्ख्यातुं न हि पार्यते गुणगणान् गंभीरतां चाद्भुताम्।



www.prapatti.com

सङ्ख्या साधु समीरिता सुलभतां प्राप्नोति सङ्ख्यावतां
सिद्धान्तस्तरसः स्फुटः प्रकटितः किं सङ्ख्यया रिक्तया॥ ३२॥

कामं देवमुपासते हि बहवः कामोप्यनङ्गोऽभवत्
कामं केचन विद्विषन्ति फलतस्ते कामदासा ध्रुवम्।
कामस्यापि पिता जगत्सु विदितः किं लौकिको वैदिकः
गोदा यं भजति स्म तं बुधवराः श्रीकामदेवं विदुः॥ ३३॥

वैकुण्ठं परमं महागृहमिति प्रोचुश्शठारातयः
तस्माद्भिन्नतया प्रतीतमखिलं लीलार्थदप्रं गृहम्।
जीवा जीवनिकापराश्च किमपि व्यातन्वते मुक्तये
तान् माहिंस विभञ्जनादि विधयेत्यात्थ त्वमेव ध्रुवम्॥ ३४॥

आशाभञ्जनं आशुतोषणकरं किं कल्पतां शोषकं
प्राप्तञ्चाल्पतरं सुखं बत कथं भूतिः प्रवृद्धा तव।
लीलायां रजसा तथैव तमसा युक्ता वयं चिन्त्यतां
स्वल्पाशामपि पूरयेति कथितं गोदा मुदोपास्महे॥ ३५॥

श्लोकैस्सप्तभिराजुहाव तनया भीष्मस्य पुण्यात्मनः
तत् श्रुत्वा त्वरया जगाम हरिणीमाहृत्य तामूढवान्।
त्रिंशत्पद्यमयीं विलिख्य सुभगां मालां निवेद्य स्वयं
श्रीरङ्गेश्वरमाह्वयस्यतितरामर्चासमाधिं कथम्॥ ३६॥

## अनुवर्ति

आत्रेय गोत्रसंभूतः श्रीनृसिंहार्यवीक्षितः।
श्रीवासराघवो दासः गोदामास्तौद्धरिप्रियाम्॥

प्रजापतौ शुभे वर्षे कर्कटे सोमवासरे।
गोदाचरणराजीवे स्तुतिमेतां समर्पये॥

॥ इति श्रीगोदास्तोत्रं संपूर्णम्॥

www.prapatti.com